“स्यादेतद्बुद्धिरेव साहङ्कारेन्द्रिया कस्मान्न संसरति कृतं सूक्ष्मशरीरेणाप्रामाणिकेनेत्यत आह। “चित्रं यथाश्रयमृते स्थाण्वादिभ्योविना यथा छाया। तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्”। लिङ्गनात् ज्ञापनात् बुद्ध्यादयोलिङ्गं तत् अनाश्रितं न तिष्ठति। जन्मप्रयाणान्तराले बुद्ध्यादयः प्रत्युत्पन्नशरीराश्रिताः प्रत्युत्पन्नपञ्चतन्मात्रवत्त्वे सति बुद्ध्यादित्वात् दृश्यमानशरीरवृत्तिबुद्ध्यादिवत्। विना विशेषैरिति सूक्ष्मैः शरीरैरित्यर्थः। आगमश्चात्र भवति ‘अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमोबलादिति”। अङ्गुष्ठमात्रत्वेन सूक्ष्मतामुपलक्षयति आत्मनो निष्कर्षासम्भवेन सूक्ष्ममेव शरीरं पुरुषस्तदपि हि पुरि स्थूलशरीरे शेते”। एवञ्च सर्वेषां भूतानां संसरणकाले सूक्ष्मदेहाश्रयत्वे स्थिते मनुष्याणामेव दाहादूर्द्धम् आतिवाहिकदेहान्तरोत्पत्तिर्नत्वन्येषां प्रागुक्तवचनात् असति तु दाहादौ न्टणां श्मशानिकभूतभावप्राप्तिरिति भेदः यथोक्तम्” शुद्धित० विष्णु०। “आतिवाहिकसंज्ञोऽसौ देहो भवति भार्गव!। केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्” इत्युपक्रम्य प्रेतपिण्डैस्तथा दत्तैर्देहमाप्नोति भार्गव!। भोगदेहमिति प्रोक्तं क्रमादेव न संशयः। प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोक्षणम्। श्मशानिकेभ्यो भूतेभ्यो नाकल्पमेव विद्यते। तत्राऽस्य यातना घोरा शीतवातातपोद्भवा इति” अत्र प्रेतकार्य्याकरणे दोषाभिधानम्। निन्दार्थवादो विधेयस्तुत्यर्थम् “न निन्द्यं निन्दनीयं निन्दति किन्तु विधेयं स्तौतीति” न्यायात्। एतच्च विद्वद्भिन्नविषयम् छा०उ० विदुषः दैवात्तदकरणेऽपि अर्चिरादिप्राप्तेरुक्तेः “अथ यदु चैवास्मिन् शव्यं कुर्व्वन्ति यदि न, अर्चिषमेवाभिसम्भवन्तीति”। एतद्भाष्यञ्च ६५१ पृष्ठे प्राग् दर्शितम्। एवं गयाश्राद्धादावपि “अग्निदग्धाश्च ये जीवा नाग्निदग्धास्तथाऽपरे तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहमिति। मन्त्रलिङ्गेनानग्निदग्धस्याप्युद्धारप्रतिपादनात्। निष्कर्षस्तु संसृतिकाले प्राणिमात्रस्य सूक्ष्मदेहप्राप्तिः तत्र पश्वादीनां दाहादिकर्म्मादिकमन्तरेणापि स्वस्वकर्म्मानुसारेण देहान्तरप्राप्तिः मनुष्याणान्तु विद्वदादिव्यतिरिक्तानां दाहादिकमन्तरेण श्मशानिकभूतभावप्राप्तिः कृते तु दाहादौ आतिवाहिकदेहप्राप्तिः पूरकपिण्डादौ पुनः प्रेतदेहप्राप्तिः सपिण्डीकरणात्परं भोगदेहप्राप्तिः। तीर्थमृतानां न तु प्रेतदेह इति भेदः “कृते सपिण्डीकरणे नरः संवत्सरात्परम्। प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते इत्युक्तेः” “ततः स नरके याति स्वर्गे वा स्वेन कर्मणा” इत्युक्तेश्च विदुषां महातीर्थमृतानां तु दैवात् दाहादिकार्य्याकरणेऽपि अर्च्चिरादिमार्गेण तत्तत्स्थानयोग्यदेहप्राप्तिरिति।

**आतिशय्य** न० अतिशय एव स्वार्थे ष्यञ्। अतिशये।

**आतिश्वायन** त्रि० अतिक्रान्तः श्वानम् नि० न समासान्तः अतिश्वा दासः अत्यधीनत्वात् अतिश्वन्+चतुरर्थ्यां पक्षा० फक्। दाससन्निकृष्टदेशादौ।

**आतिष्ठ** न० अति+स्था–क षत्वम् अतिष्ठस्तस्य भावः अण्। अतिक्रम्य स्थितौ उत्कर्षे। “आधिपत्याय स्वावश्यायातिष्ठायाऽऽरोहामि” ऐ०ब्रा०।

**आतु** पु० अत–उण्। भेलके। (भेला) उडपे।

**आतुच्** पु० “आतुचिर्गमनार्थ इति” ऋ०भा० आधारे क्विप्। सूर्य्यस्यास्तगतिकाले तस्य निम्लोचनकाले अस्तकाले “यदद्यसूर उदिते यन्मध्यन्दिन आतुचि” ऋ० ८,२७,२१, “आतुचि सायम्” भा०।

**आतुजि** त्रि० आ+तुज–हिंसाबलादाननिकेतनेषु इन्। हिंसके बलस्यादायके च। “पिबतं सोममातुजी” ७,६६ ६८, “आतुजी हिंसकौ आदातारौ वा” भा०।

**आतुर** त्रि० ईषदर्थे आ+अत–उरच्। कार्य्याक्षमे उज्ज्व० “घृतमुत्तमं विधिविपक्वमाहितं प्रपिबन्निदं जयति कुष्ठमातुरः” उज्ज्व० वैद्य० २पीड़िते च। “रावणावरजा तत्र राघवं मदनातुरा” रघुः। “न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि” “बालवृद्धातुरैविना” “आकाशेशास्तु विज्ञेया बालवृद्धकृशातुरा” इति च मनुः। आतुरे नियमो नास्ति” स्मृतिः। [ धिवच्यते।

**आतुरसंन्यास** न० ६त०। संन्यासभेदे सन्यासशब्दे तद्वि-

**आतुरोपक्रमणीय** पु० आतुरमधिकृत्य रोगनिवारणाय उपक्रमणीयम्। आतुरस्य चिकित्सार्थमायुर्व्याध्यृत्वग्निवयोदेहबलसत्वसात्म्यप्रकृतिभेषजदेशानुसारेण उपक्रमणीये १व्यापारभेदे तदधिकृत्यकृतोग्रन्थः छ। २तत्प्रतिपादकग्रन्थे च। स च सुश्रुतान्तर्गतोऽध्यायभेदः। तत्रोक्तविशेषं ज्ञात्वा वैद्यैरातुरस्य रोगनिवारणायोपक्रमणीयम्। स चाध्यायस्तावद्दर्श्यते यथा “अथात आतुरोपक्रमणीयमध्यायम् व्याख्यास्यामः॥ आतुरमुपक्रममाणेन भिषजायुरेवादौ परीक्ष्येत। सत्यप्यायुषि व्याध्यृत्वग्निवयोदेहबलसत्वसात्म्यप्रकृतिभेषजदेशान् परीक्षेत॥ तत्र महापाणिपादपार्श्वपृष्ठस्त-